# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

कक्षा - आचार्यद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम्** - ४ गुणाः - ७०

विषयः - नव्यव्याकरणम् **कोड** - C.C-5.3.9 समयः - ११:०० तः २:००

दिनाङ्कः - २८.११.२०१६ सन्दर्भग्रन्थः - वाक्यपदीयं, निरुक्तं च

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ निम्नलिखितयोरेकस्य श्लोकस्य सप्रसङ्गं व्याख्या कार्या- (४)

क. आख्यातशब्दः सङ्घातो जातिः सङ्घातवर्तिनी। एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहतिः॥

ख. साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यते

प्रश्नः २ निम्नलिखितेषु श्लोकत्रयं सप्रसङ्गं व्याख्येयम् (१२)

क. यथानेकमपि क्त्वान्तं तिङन्तस्य विशेषकम्।तथा तिङन्तं तत्राहुस्तिङन्तस्य विशेषकम्॥

ख. तथैवैकस्य वाक्यस्य निराकाङ्क्षस्य सर्वतः। शब्दान्तरैः समाख्यानं साकाङ्क्षैरनुगम्यते॥

ग. वर्णान्तरसरूपं च वर्णभागेषु दृश्यते। पदान्तरसरूपाश्च पदभागा अवस्थिताः॥

घ. ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले। देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः॥

ङ. नित्येषु च कुतः पूर्वं परं वा परमार्थतः एकस्यैव तु सा शक्तिर्यदेवमवभासते॥

प्रश्नः ३ निम्नलिखितेषु प्रश्नेषु चतुर्णांप्रश्नानां लघूत्तरंलेख्यम्- (४)

क. वाक्यपदीये वाक्यविषये कति मतानि उपस्थापितानि?

ख. वार्त्तिककारस्य मतौ वाक्यस्य किं लक्षणम्?

ग. मीमांसकमते वाक्यस्य किं लक्षणम्?

घ. 'व्रजानि देवदत्त' इत्यत्र देवदत्तशब्द: कीदृशः?

ङ. वाक्यं साकाङ्क्षं भवति उत निराकाङ्क्षम्?

च. विभागैः प्रक्रियाभेदं कः प्रतिपद्यते?

द्वितीयान्वितिः (युनिट- २)

प्रश्नः ४ निम्नलिखितयोरेकस्य श्लोकस्य सप्रसङ्गं व्याख्या कार्या- (४)

क. समूहः स तथाभूतः प्रतिभेदं समूहिषु। समाप्यतेऽतो भेदे कालभेदस्य सम्भवः॥

ख. यथा गौरिति सङ्घातः सर्वो नेन्द्रियगोचरः। भागशस्तूपलब्धस्य बुद्धौ रूपं निरूप्यते॥

प्रश्नः ५ निम्नलिखितेषु श्लोकत्रयं सप्रसङ्गं व्याख्येयम् (१२)

क. यथा च भागाः पचतेरुदकासेचनादयः। उदकासेचनादीनां ज्ञेया भागास्तथापरे॥

ख. यश्चापकर्षपर्यन्तमनुप्राप्तः प्रतीयते। तत्रैकस्मिन् क्रियाशब्दः केवले न प्रयुज्यते॥

ग. कालानुपाति यद् रूपं तदस्तीति प्रतीयते। परितस्तु परिच्छिन्नं भाव इत्येव कथ्यते॥

घ. आहितोत्तरशक्तित्वात् प्रत्येकं वा समूहिनः। अनेकरूपा लक्ष्यन्ते क्रमवन्त इवाक्रमाः॥

ङ. जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्। असाध्या व्यक्तिरूपेण सा साध्येवोपलभ्यते॥

प्रश्नः ६ निम्नलिखितेषु प्रश्नेषु चतुर्णाप्रश्नानां लघूत्तरंलेख्यम्- (४)

क. निराकांक्षस्य अर्थस्य ज्ञानं कया क्रियया भवति?

ख. क्रियायाः लक्षणं किम्?

ग. क्रियावाचकस्य का संज्ञा भवति?

घ. ध्वनिः आश्रितक्रमः कथं भवति?

ङ. क्रियायाम् अभेदत्वं कथं प्रतिपाद्यते?

च. क्रिया कतिविधा भवति?

तृतीयान्वितिः (युनिट- ३)

प्रश्नः ७ निम्नलिखितयोरेकस्य श्लोकस्य सप्रसङ्गं व्याख्या कार्या- (४)

क. सामान्यभूता सा पूर्वं भागशः प्रविभज्यते। ततो व्यापाररूपेण साध्येव व्यवतिष्ठते।।

ख. साध्यत्वात् तत्र चाख्यातैर्व्यापाराः सिद्धसाधनाः। प्राधान्येनाभिधीयन्ते फलेनापि प्रवर्तिताः।।

प्रश्नः ८ निम्नलिखितेषु श्लोकद्वयं सप्रसङ्गं व्याख्येयम्- (८)

क. सिद्धस्यार्थस्य पाकादेः कथं साधनयोगिता। साध्यत्वे वा तिङन्तेन कृतां भेदो न कश्चन।।

ख. एतावत् साधनं साध्यमेतावदिति कल्पना। शास्त्र एव न वाक्येऽस्ति विभागः परमार्थतः।।

ग. साध्यत्वेन क्रिया यत्र धातुरूपनिबन्धना। सत्त्वभागस्तु यस्तस्याः स घञादिनिबन्धनः।।

घ. मृगो धावति पश्येति साध्यसाधनरूपता। तथा विषयभेदेन सरणस्योपपद्यते।।

प्रश्नः ९ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरं देयम्- (३)

क. साध्यं, साधनं, फलं, तद्भोक्ता च एतेषु सर्वेषु का व्यवस्थिता?

ख. पाक-शब्दे कः प्रत्ययः?

ग. 'पश्य मृगो धावति' इति वाक्ये 'धावति' इति क्रिया साधनं वा साध्यं वा?

घ. कृत्य-प्रत्ययान्तेषु शब्देषु धातुः कस्य वाचकः?

ङ. 'बन्धुता' इति शब्दे तल्-प्रत्ययस्य कः अर्थः?

चतुर्थान्वितिः (युनिट- ४)

प्रश्नः १० निम्नलिखितयोरेकस्य प्रश्नस्य उत्तरं लेख्यम्- (४)

क. आचार्य-यास्कानुसारं निपातलक्षणं प्रतिपादयत।

ख. आचार्य-यास्कानुसारं मन्त्रेषु अर्थवत्त्वं प्रतिपादयत

प्रश्नः ११ निरुक्तस्य प्रथमाऽध्यायस्य विषयान् प्रतिपादयत। (८)

अथवा

आचार्य-यास्कस्य परिचयः प्रस्तूयताम्

प्रश्नः १२ निम्नलिखितेषु त्रयाणां प्रश्नानां लघूत्तरंलेख्यम्- (३)

क. 'समाम्नायः समाम्नातः' इत्यस्य कोऽर्थः?

ख. निरुक्तकारानुसारं पदप्रकाराः कति सन्ति?

ग. 'निगमा इमे भवन्ति' इत्यस्य कोऽर्थः?

घ. भावविकाराः कति सन्ति?

ङ. 'शाखाः खशयाः' कस्य इत्यस्य कोऽर्थः?

***